राज्ञा प्रतिष्ठितो धर्मो धर्मात्स्वर्गः प्रतिष्ठितः ।
राज्ञो यज्ञक्रिया· सर्वा यज्ञाद्देवाः प्रतिष्ठिताः ।
देवाद्वृष्टिः प्रवर्तेत वृष्टेरोषधयः स्मृताः ।
ओषधिभ्यो मनुष्याणां धारयन्सततं हितम् ।
मनुष्याणां च यो धाता राजा राज्यकरः पुनः ।
दशश्रोत्रियसमो राजा इत्येव मनुरब्रवीत् ।

[(L 1) G1 2 4 5 दोषो जायेत वै तदा — (L. 2) K3 Da1 D1 G1 2 4 5 उद्धतं G1 2. 4 5 °जा धर्मेण. — (L. 4) G1 2 4 5 राज्ञा प्रवर्तते धर्मो नोद्विग्नश्चरते प्रजाः — (L. 5) K3 B1–4 Da D4 5 प्रवर्तते; K4 B5 D2 °वर्त्यते; D1. 3 °वर्तितो (for प्रतिष्ठितो). — (L 8) B4 Da D4 5 धारयेत्; G1 2. 4. 5 जायते — (L. 10) D3 सुखदः श्रोत्रियो राजा; G1 2 4 5 सुदुःखः श्रोत्रियः सोम (G1 साम; G4 सोम्य).]

After 402*, K3. 4 Ñ3 B Da D2. 4 repeat 26cd, while

३८

शृङ्ग्युवाच ।
यद्येतत्साहसं तात यदि वा दुष्कृतं कृतम् ।
प्रियं वाप्यप्रियं वा ते वागुक्ता न मृषा मया ॥ १
नैवान्यथेदं भविता पितरेष ब्रवीमि ते ।
नाहं मृषा प्रब्रवीमि स्वैरेष्वपि कुतः शपन् ॥ २
शमीक उवाच ।
जानाम्युग्रप्रभावं त्वां पुत्र सत्यगिरं तथा ।
नानृतं ह्युक्तपूर्वं ते नैतन्मिथ्या भविष्यति ॥ ३
पित्रा पुत्रो वयःस्थोऽपि सततं वाच्य एव तु ।
यथा स्याद्गुणसंयुक्तः प्राप्नुयाच्च महद्यशः ॥ ४
किं पुनर्बाल एव त्वं तपसा भावितः प्रभो ।
वर्धते च प्रभवतां कोपोऽतीव महात्मनाम् ॥ ५
सोऽहं पश्यामि वक्तव्यं त्वयि धर्मभृतां वर ।
पुत्रत्वं बालतां चैव तवावेक्ष्य च साहसम् ॥ ६
स त्वं शमयुतो भूत्वा वन्यमाहारमाहरन् ।
चर क्रोधमिमं त्यक्त्वा नैवं धर्मं प्रहास्यसि ॥ ७
क्रोधो हि धर्मं हरति यतीनां दुःखसंचितम् ।
ततो धर्मविहीनानां गतिरिष्टा न विद्यते ८ C 1 1732 B 1 42 8 K 1.42 8

Ñ2 V1 Dn D1 7 T1 G4 5 repeat 26. a further indication of the spurious character of the passage.

27 ^{a}) K3 Ñ2 3 V1 B D (except D5) T1 कस्मात् Ko. 2 4 एतत् (for इदं) G2 3 °दं कृतं. — ^{d}) G1 स मत्तः, G2 रक्षिता (for असत्तः) T सर्वदा — After 27, Ko 4 ins. four lines given in App I (No. 22).

Colophon. *Sub-parvan* All MSS except Dn3 आस्तीक (v l आस्तिक, अस्तीक) — *Adhy name* Ko 2 4 ऋषिशापदानं, Ñ1 2 V1 G2 3 परिक्षिच्छाप: — *Adhy. no* (figures, words or both) S1m 48, K3 (*sup lin sec m*) T 34, Ñ1 2 V1 Dn3 41, D4m 39, D5 7, G M 24 (G2 3 26, G6 M3 25) — *S'loka no* Ñ3 Da1 Dn1 n2 33, Dn3 32 — *Aggregate s'loka no* Dn2 1694.

38

1 Ś1 K1 S (M4 with prefixed श्री.) श्रृंगी — ^{a}) Ś1 यद्येदं (sic), Ko G2 3 यदेतत्, K1 यद्येव — ^{c}) B4 विप्रियं वा प्रि° Ko 2 4 D5 T2 G2 3 6 M1 3 अपि — ^{d}) D5 G2 4. 5 प्रागुक्ता (D5 °क्तं) Ñ1 2 V1 B D T1 भवेत्, G2 3. 6 मम (for मया)

2 ^{a}) D3 6. 7 न चान्य°; T2 G1 6 °न्यथा तत्; G5 °न्यथावत्, M2 4 °न्यथैव G2 3 याव(G3 यत्व)दुक्तं तु भवता — ^{b}) Ko 2. 4 B3 4 5m D5 T2 G पितरेतद् (G2 3 पुनरेव), M1 5 °रेवं — ^{c}) T1 न हि (for नाहं) D4 °हं वृथा Ñ1 2 V1 B D2-7 T1 ब्रवीम्येवं — ^{d}) D2 संरब्धोपि, D3 स्वैरं वापि. Ś1 K D5 कुतोन्यथा

3 Ś1 D8 S om. उवाच. — ^{a}) G2 M2 °प्रतापं M (except M2) त्वा. — ^{b}) K3 Ñ1 2 V1 B D T1 M तात, T2 G2 3 6 तव (for पुत्र). T G2. 3 6 सत्यां गिरं. — ^{c}) K3 Ñ1 2 V1 B D च (for हि).

4 ^{c}) Ñ3 B1 2 4 5 D2 4 G5 °युक्तश्च, B3 Da D5 G4 °युक्तस्तु (for °संयुक्तः)

5 ^{a}) G2 3 किं बाल एव त्वं वत्स — ^{b}) K3 द्योतितप्रभः; G1 भावितात्मना K2 4 D2 प्रभुः, Ñ1 2 V1 B1 2m Dn D1 3 4 6 7 T1 सदा (for प्रभो). — ^{c}) S (except T1 G2 6) चेत् (for च) — ^{d}) S1 Ko 1 2m Ñ3 D5 मनीषिणा, K2-4 मनस्वि° (for महा°) — After 5, D3 6 S (except T1 G3 6 M1 5) ins

403* उत्सीदेयुरिमे लोकाः क्षमा चास्य प्रतिक्रिया ।

6 ^{c}) Ś1 K1 पुत्रतां; D2 पुत्र ते G1 4 5 बालकत्वं च. T2 G2 3 6 M1 5 पुत्रत्वाद्बाल(G2 °ल्य)भावाच्च. — ^{d}) Ś1 K B1 3 Da D2 4 5 तथावे(Ś1 K1 3 D5 वी)क्ष्य. Ko. 2 इह (for च)

7 ^{a}) Ñ1 2 3 (*sup. lin. sec m*) V1 Dn D1 3 6 7 T शमपरो (Ñ3 orig corrupt), B Da D2 4 सुसंयतो; G1 M4 °ग्वितो; G2 3 °यिता. — ^{b}) Ñ1 2 V1 B4 D (except Da D2 4 5) T1 °माचरन् G6 नातः साहसमाचर — ^{c}) D2 5 G2 3 6 चरन् G1 कोपम् Ñ1 2 V1 Dn D1 T1 हत्वा, B Da D2-4 6 7 हित्वा. — ^{d}) K1 D3 4. 7 G3 6 M नैव

8 ^{a}) G4 5 °र्मं हंतीमं. — ^{b}) Ko पूर्वसंचितं. — ^{c}) G2 3 तपोधर्म° — After 8, Ko 4 ins. two lines given in App I (No 23), cf. v. l 11.

9 ^{a}) G4 क्षमैव तु; G5 6 क्षम एव; Cd as in text. M (except M1. 5) तु (for हि). — ^{b}) Ś1 सिद्धिदायकः.

शम एव यतीनां हि क्षमिणां सिद्धिकारकः ।
क्षमावतामयं लोकः परश्चैव क्षमावताम् ॥ ९
तस्माच्चरेथाः सततं क्षमाशीलो जितेन्द्रियः ।
क्षमया प्राप्स्यसे लोकान्ब्रह्मणः समनन्तरान् ॥ १०
मया तु शममास्थाय यच्छक्यं कर्तुमद्य वै ।
तत्करिष्येऽद्य ताताहं प्रेषयिष्ये नृपाय वै ॥ ११
मम पुत्रेण शप्तोऽसि बालेनाकृतबुद्धिना ।
ममेमां धर्षणां त्वत्तः प्रेक्ष्य राजन्नमर्षिणा ॥ १२

सूत उवाच ।

एवमादिश्य शिष्यं स प्रेषयामास सुव्रतः ।
परिक्षिते नृपतये दयापन्नो महातपाः ॥ १३
संदिश्य कुशलप्रश्नं कार्यवृत्तान्तमेव च ।
शिष्यं गौरमुखं नाम शीलवन्तं समाहितम् ॥ १४
सोऽभिगम्य ततः शीघ्रं नरेन्द्रं कुरुवर्धनम् ।
विवेश भवनं राज्ञः पूर्वं द्वाःस्थैर्निवेदितः ॥ १५
पूजितश्च नरेन्द्रेण द्विजो गौरमुखस्ततः ।
आचख्यौ परिविश्रान्तो राज्ञे सर्वमशेषतः ।
शमीकवचनं घोरं यथोक्तं मन्त्रिसंनिधौ ॥ १६
शमीको नाम राजेन्द्र विषये वर्तते तव ।
ऋषिः परमधर्मात्मा दान्तः शान्तो महातपाः ॥ १७
तस्य त्वया नरव्याघ्र सर्पः प्राणैर्वियोजितः ।
अवसक्तो धनुष्कोट्या स्कन्धे भरतसत्तम ।
क्षान्तवांस्तव तत्कर्म पुत्रस्तस्य न चक्षमे ॥ १८
तेन शप्तोऽसि राजेन्द्र पितुरज्ञातमद्य वै ।
तक्षकः सप्तरात्रेण मृत्युस्ते वै भविष्यति ॥ १९
तत्र रक्षां कुरुष्वेति पुनः पुनरथाब्रवीत्
तदन्यथा न शक्यं च कर्तुं केनचिदप्युत ॥ २०
न हि शक्नोति संयन्तुं पुत्रं कोपसमन्वितम् ।

— ^{d}) Ś1 K1 परलोकः Ñ3 D5 T2 G2 3 6 M1 5 चापि (for चैव) Ñ3 D5 G2 3 M1 5 तपस्विनां

10 ^{a}) K3 पुण्यं तस्माच्चरेथास्त्वं — ^{c}) G4.5 लोकं. — ^{d}) D3 T1 G4 5 समनतरं

11 ^{a}) G6 अहं (for मया) Ś1 K1 अत्र (for तु) — ^{b}) Ś1 K1 °मर्हसि. G6 वक्तुं तद्वाक्यमद्य वै — ^{c}) K2 °ष्ये तथा शिष्यं; Ñ1 2 V1 B D T1 °ष्याम्यहं तात (B5 शिष्य); T2 G1–5 M °ष्यामि ताता(G2.3 तत्रा)हं. G6 शिष्यं धर्मभृतस्तात — ^{d}) S (except T1) नृपस्य वै — After 11, K4 ins. two lines given in App I (No 23), cf v 1 8

12 ^{b}) Ñ1 2 V1 B1 बालेन कृश(B1 °त)बु° — ^{c}) K (except K1) ममैतां, G4 5 ममैनां

13 S1 K1 S (G3 om) सूतः, K0 4 Ñ1 2 V1 B1 D (except Da D2 4 5) सौतिरु°. — ^{a}) D6 G3 पुत्र; M1 5 सूतं (for शिष्यं) G1 M2 3 स्वं; G2 3 6 वै — ^{d}) K (except K1) Cd कृपापन्नो; D5 दययानो, G2 यथा वक्तुं; G3 यथा°. K1 G1 4 5 महामनाः

14 ^{d}) S1 K गुणान्वितं

15 ^{b}) K4 B4 D1 G (except G6) M (except M1 5) कुलवर्धनं. — ^{c}) G2 3 भवनद्वारं

16 ^{a}) Ñ1 2 V1 D (except Da D2 4 5) T1 G6 तु (for च) — ^{b}) K2 Ñ1 2 V1 B D G1.3 M (except M1 5) तदा (B4 D7 °था), T1 G2 6 as in B4 D7. — ^{c}) Ñ1.2 V1 D (except Da D2 4.5) T1 M2 3 (*inf. lin* as in text) 4 च परि°, G4 5 विपरि° (for परिवि°) G2 3 आचख्याव(G2 °वि)परिश्रांतो — ^{d}) K3 4 Ñ1 2 V1 B D (except D5) T1 G2 राज्ञः. — ^{f}) G2 3 मित्रसं°.

17 Before 17, K3 B1 2 ins ऋषिरु°; Ñ2 3 V1 B3–5 Dn D1–4 7 गौरमुख उ°, D6 T1 G2 3 6 M गौरमुखः. — ^{a}) Ś1 राजर्षे — ^{b}) Ñ1 2 V1 Da1 Dn (except Dn1) transp विष° and वर्त° D1 transp वर्त° and तव. G2 3 6 वसते तव, M1 5 वसतीह ते — ^{c}) T2 G2 3 6 M1.5 ऋषिः शमदमोपेतो — ^{d}) Ś1 G4 5 M2–4 transp दान्तः and शान्त° M2 4 (*sup lin* as in text) जितेंद्रियः. T2 G2 3 6 M1 5 मौनव्रतसमन्वितः (G2 3 °परायणः)

18 T2 G2 3 6 transp 18^{b} and 18^{a} — ^{b}) M1 3 (*inf lin* as in text) 5 मृगयां परिधावता (=1 37 3^{b}) — ^{d}) For 18^{d}, M1 5 read 18^{b} Ñ1 2 V1 B D T1 स्कंधे मौनान्वितस्य च (B3 5 Da D5 ह) K1 ins प्रमाण नवरालत्रयं between °ष्कोट्या and स्कन्धे — M1 5 om. 18^{ef} — ^{e}) G2 3 क्षं(G3 क्षां)तव्य° Ś1 K1 तात (for तव) — ^{f}) D5 च नाक्षमत् (for न च°)

19 ^{ab}) D5 °जेंद्र न पितुः संनिधौ परं. M1 5 तस्य पुत्रेण शप्तोसि श्रुत्वेमां धर्षणां पितुः — ^{c}) Ś1 K0 1 D2 G6 M1 5 तक्षकात् — ^{d}) Ś1 K1 Ñ3 T2 G2 3 6 M1.5 transp. ते and वै. Ñ1 2 V1 B D T1 तव (for ते वै).

20 ^{ab}) T2 G (except G1) तस्य (for तत्र) M (except M1 5) °रभाषत D5 पुनः पुनरुवाचेदं तव रक्षां कुरुष्वेति. — ^{c}) Ś1 वै; T2 G1–3 M (except M4) हि

ततोऽहं प्रेषितस्तेन तव राजन्हितार्थिना ॥ २१
इति श्रुत्वा वचो घोरं स राजा कुरुनन्दनः ।
पर्यतप्यत तत्पापं कृत्वा राजा महातपाः ॥ २२
तं च मौनव्रतधरं श्रुत्वा मुनिवरं तदा ।
भूय एवाभवद्राजा शोकसंतप्तमानसः ॥ २३
अनुक्रोशात्मतां तस्य शमीकस्यावधार्य तु ।
पर्यतप्यत भूयोऽपि कृत्वा तत्किल्बिषं मुनेः ॥ २४
न हि मृत्युं तथा राजा श्रुत्वा वै सोऽन्वतप्यत ।
अशोचदमरप्रख्यो यथा कृत्वेह कर्म तत् ॥ २५
ततस्तं प्रेषयामास राजा गौरमुखं तदा ।
भूयः प्रसादं भगवान्करोत्विति ममेति वै ॥ २६
तस्मिंश्च गतमात्रे वै राजा गौरमुखे तदा ।
मन्त्रिभिर्मन्त्रयामास सह संविग्नमानसः ॥ २७
निश्चित्य मन्त्रिभिश्चैव सहितो मन्त्रतत्त्ववित् ।
प्रासादं कारयामास एकस्तम्भं सुरक्षितम् ॥ २८
रक्षां च विदधे तत्र भिषजश्चौषधानि च ।
ब्राह्मणान्सिद्धमन्त्रांश्च सर्वतो वै न्यवेशयत् ॥ २९
राजकार्याणि तत्रस्थः सर्वाण्येवाकरोच्च सः ।
मन्त्रिभिः सह धर्मज्ञः समन्तात्परिरक्षितः ॥ ३०
प्राप्ते तु दिवसे तस्मिन्सप्तमे द्विजसत्तम ।
काश्यपोऽभ्यागमद्विद्वांस्तं राजानं चिकित्सितुम् ३१
श्रुतं हि तेन तदभूदद्य तं राजसत्तमम् ।
तक्षकः पन्नगश्रेष्ठो नेष्यते यमसादनम् ॥ ३२
तं दष्टं पन्नगेन्द्रेण करिष्येऽहमपज्वरम् । C 1 1759 B 1 42 35 K 1.42 36

(for च) — ^{d}) K2 वाक्यं (for कर्तुं)

21 ^{a}) Ś1 यो न, K1 तव, D7 न च (for न हि). Ñ1 2 V1 Dn D1 3 7 तं यंतुं; D5 तं शत्रुं — ^{b}) B5 क्रोधस°. — ^{c}) G2 3 इदानीं प्रे°

22 Before 22, Ko 2 (marg) 4 B3 4 Dn3 D1 4 ins सौतिरु°, K3 Ñ2 V1 Dn1 n2 D3 5 (marg) 7 सूत उ°; D6 S (except G3) सूत·. — ^{b}) G2 3 कुरूणां (!) वरः ^{d}) Ko 4 रोपात्, K2 शोचन, Ñ3 ब्रह्मन्, D6 राजन्. Ko 2–4 Ñ3 महामनाः, D2 5 °यशा S (except T1) कृत्वा ब्रह्मन्महात्मनः

23 ^{a}) Ñ1 2 V1 Dn D1 3 4 6 7 T1 °व्रतं श्रुत्वा, Da °व्रतचरं G2 3 तच्च गौरमुखाद्धोरं — ^{b}) Ñ1 2 V1 D (except Da D2 5) T1 वने (for श्रुत्वा) Ś1 K1 Ñ3 G1 4 5 ततः, Ko T2 G6 °था (for °दा) G2 3 शापस्य विवरं तदा — S1 K1 D3 (hapl) om 23^{d}–25^{a} — ^{d}) °संताप°.

24 Ś1 K1 D3 om. 24 (cf v l 23) — ^{b}) Ko 3 T2 G4–6 °कस्योपधार्य तु (K3 °धारयन्) Ñ1 2 V1 B D (D3 om) T1 च (for तु) — ^{d}) M2 4 transp कृत्वा and तत्

25 S1 K1 D3 om 25^{a} (cf v l 23) K3 मृत्युभयाद्राजा G (except G3 6) M1 3 5 तदा (for °था). M2 4 °था श्रुत्वा — ^{b}) G2 3 दृष्ट्वा वै, M2 4 राजा वै. K3 पर्य°, G3 °पद्यत — ^{c}) M1 3 5 °चतामर°.

26 ^{d}) K2 अद्य, Ñ1 2 V1 B (except B5) D T1 M4 इह (for the first इति) S (except T1) एष (for the second इति) — After 26, B3 ins an additional colophon, while T2 G (except G3) ins.

404* श्रुत्वा तु वचनं राज्ञो मुनिर्गौरमुखस्तदा ।
तमनुज्ञाप्य वेगेन प्रजगामाश्रमं गुरोः ।

27 Before 27, B3 ins सौतिरु°. — ^{a}) S (except T1 G1) तु (for च) Ñ1, 2 V1 B D T1 अथ, Ñ3 स, T2 G (except G2) M1 5 तु (for वै) — ^{b}) S1 Ko–2 ततः; D3 °था (for °दा). — ^{d}) G2 3 सर्वैः (for सह) K4 सह संव्यग्र°; B3 D2 सहसोद्विग्न° Cd has उद्विग्रमनसः (sic).

28 ^{ab}) Ñ1 2 V1 B D T1 संमंत्र्य (for नि°), and स तथा मंत्र° M1 3 5 °तो हितमात्मन.. — ^{d}) G2 3 6 चैक°. D5 एकस्तंभेन र°

29 ^{c}) K3 मंत्रससिद्धान्, Ñ1 2 V1 B D T1 मंत्रसिद्धांश्च — ^{d}) Ñ1 2 V1 B D T1 न्ययोजयत्, M2 4 °वेद°.

30 ^{b}) Da °व चकार स·, D3 °व करोति सः — ^{c}) G1 2 4–6 मंत्रज्ञैः, G3 M1 5 मंत्रज्ञः — After 30, K3 4 Ñ2 3 (marg *sec m*) V1 B D T1 ins

405* न चैनं कश्चिदारूढं लभते राजसत्तमम् ।
वातोऽपि निश्चरंस्तत्र प्रवेशे विनिवार्यते ।

[(L 1) K4 B (except B1) D (except Dn) T1 N1lp °दा रोद्धुं K4 B1 2 5 Da D2 5 द्विजसत्तम — (L 2) Da विचरं°.]

31 ^{a}) Ñ1 2 V1 B D T1 च, G2 हि (for तु) — ^{b}) K3 4 Ñ V1 B (except B4) D (except D5) T1 °सत्तमः — ^{c}) S1 K (except K3) D5 कश्यपो.

32 G1 4 5 transp 32 and 33 — ^{a}) G2 कृतं, G3 ज्ञा° K3 तत्सर्वं, B5 तदहः, D5 तद्भूतं. — ^{b}) Ko 3 Ñ1 2 V1 B D T1 G5 यथा (for अद्य) — For 32^{d}, Ko. 2. 4 G1 subst. 36^{d}.

C. 1 1759 B. 1 42 35 K 1 42.36 तत्र मेऽर्थश्च धर्मश्च भवितेति विचिन्तयन् ॥ ३३
तं ददर्श स नागेन्द्रस्तक्षकः काश्यपं पथि ।
गच्छन्तमेकमनसं द्विजो भूत्वा वयोऽतिगः ॥ ३४
तमब्रवीत्पन्नगेन्द्रः काश्यपं मुनिपुंगवम् ।
क्व भवांस्त्वरितो याति किं च कार्यं चिकीर्षति॥३५

काश्यप उवाच ।

नृपं कुरुकुलोत्पन्नं परिक्षितमरिंदमम् ।
तक्षकः पन्नगश्रेष्ठस्तेजसाद्य प्रधक्ष्यति ॥ ३६
तं दष्टं पन्नगेन्द्रेण तेनाग्निसमतेजसा ।
पाण्डवानां कुलकरं राजानममितौजसम् ।
गच्छामि सौम्य त्वरितं सद्यः कर्तुमपज्वरम् ॥ ३७

तक्षक उवाच

अहं स तक्षको ब्रह्मंस्तं धक्ष्यामि महीपतिम् ।
निवर्तस्व न शक्तस्त्वं मया दष्टं चिकित्सितुम् ॥ ३८

काश्यप उवाच

अहं तं नृपतिं नाग त्वया दष्टमपज्वरम् ।
करिष्य इति मे बुद्धिर्विद्याबलमुपाश्रितः ॥ ३९

इति श्रीमहाभारते आदिपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥

३९

तक्षक उवाच ।

दष्टं यदि मयेह त्वं शक्तः किंचिच्चिकित्सितुम्
ततो वृक्षं मया दष्टमिमं जीवय काश्यप ॥ १
पर मन्त्रबल यत्त तद्दर्शय यतस्व च ।

33 For G1.4 5 cf v. l 32 — a) G1 4 5 M (except M1 5) भुजगेन्द्रेण — c) M1 5 मेर्थं च धर्मं च — d) G1 4 M2 3 भवेदिति; G2 3 विद्य(G3 °द्ये)तेति

34 b) M1 5 (? hapl) om. 34b–35a. Dn2 D5 G2 3 प्रति (for पथि). K4 M2 4 transp. काश्य° and पथि. d) S (except M1 3 5) वयोधिकः, Cd as in text

35 M1 5 om. 35a (cf. v. l. 34). — b) K3 G1 M °सत्तम; G4 5 द्विज°. — K1 om. 35c–36b. — c) G1 M (except M1 5) क्व वै भवानितो याति. — d) S1 भोस्त्वं (for कार्यं). Ś1 D6 G3 चिकीर्षसि, D5 °र्षितं.

36 S1 D6 S om. उवाच — K1 om 36ab (cf v. l. 35) — d) Cf. v l 32. B1 5 D2 अभि-, B4 वि-, T2 सं- (for अद्य) S1 प्रधक्ष्यति स्वतेजसा.

37 b) Ñ1 2 V1 Dn °तेजसं — c) M1 5 कुलधरं. G4 5 पांडवेयं महात्मानं — e) Ñ3 S (except G2) त्वरितः. Ñ1 2 V1 B D T1 transp सौम्य and त्वरि°. — f) D5 सखे (for सद्यः) — After 37, G (except G3.6) ins.

406* विज्ञातविषविद्योऽहं ब्राह्मणो लोकपूजितः ।
अस्मद्गुरुकटाक्षेण कल्योऽहं विषनाशने ।

38 S1 K1 D6 S तक्षक.. — a) T2 G2 3 6 हि, Cd स (as in text). — cd) G2 निवर्तयेथा श°, G3 निवर्तय न श° G1 4-6 निवर्तस्व मया दष्टं न शक्यं स्याच्चि°.

39 S1 K1 D6 S om. उवाच. — a) K3 transp अहं and तं. D5 हि; T2 G तु (for तं). Ñ1.2 V1 B D T1 °ति गत्वा. — c) Ñ2 D (except D2 5) T1 M (except M1.5) करिष्यामीति. — d) S1 K1 °मु(K1 °म)पाश्रिता. Ñ2 Dn1 n3 D7 M2 4 °समन्विता, B3 D4 T2 G3 6 M1.3 5 °समाश्रितः (G6 M1 °ता; M5 °त); Dn2 D1 3 5.6 T1 °समन्वितः (T1 °तं); G2 °समाश्रयं

Colophon om in D2 — *Sub-parvan* All MSS (D2 om) आस्तीक (v. l आस्तिक, अस्तीक) — *Adhy. name* Ko 2 4 राज्ञो रक्षाविधान, K3 तक्षककाश्यपसमागमः; Ñ1.2 V1 काश्यपागमनं, T2 G3 काश्यपतक्षकसंवाद.. — *Adhy no.* (figures, words or both). Ś1 49, Ko 37, K1 9, K3 (marg *sec m*) T 35, Ñ1 2 V1 Dn3 42, B1 41, B2 D3 4m 40, D5 8, G M 25 (G2 3 27, G6 M3 26) — *S'loka no* Ñ3 43, Dn 41. — *Aggregate s'loka no* Dn2 1735.

39

1 S1 K1 D3 S (T2 with prefixed श्री) तक्षकः. — a) Ñ1 2 V1 B D T1 transp. दष्टं and यदि — b) Ko.3 B2 कच्चित्; K2 क°; M1 3 5 किल. — c) G M (except M1 5) transp. वृक्षं and दष्टं. Ś1 इदं, G1 इमं (for मया). Ko 2 Ñ3 दग्धं. — d) S1 मया, D7 इदं

2 b) D1 G1 4 5 M (except M1 5) दर्शयस्व य°. T1 ततः स्वयं, G2.3 यतव्रत. K2 तद्दर्शयत तत्वतः (m as in text). — c) M2 3 °नं दशामि. — After 2, M ins.

407* सूतः ।
एवमुक्तस्तक्षकेण काश्यपः पुनरब्रवीत् ।
[M1.5 om. सूतः.]

न्यग्रोधमेनं धक्ष्यामि पश्यतस्ते द्विजोत्तम ॥ २

काश्यप उवाच ।

दश नागेन्द्र वृक्षं त्वं यमेनमभिमन्यसे ।
अहमेनं त्वया दष्टं जीवयिष्ये भुजंगम ॥ ३

सूत उवाच ।

एवमुक्तः स नागेन्द्रः काश्यपेन महात्मना ।
अदशद्वृक्षमभ्येत्य न्यग्रोधं पन्नगोत्तमः ॥ ४
स वृक्षस्तेन दष्टः सन्सद्य एव महाद्युते ।
आशीविषविषोपेतः प्रजज्वाल समन्ततः ॥ ५
तं दग्ध्वा स नगं नागः काश्यपं पुनरब्रवीत् ।
कुरु यत्नं द्विजश्रेष्ठ जीवयैनं वनस्पतिम् ॥ ६
भस्मीभूतं ततो वृक्षं पन्नगेन्द्रस्य तेजसा ।
भस्म सर्वं समाहृत्य काश्यपो वाक्यमब्रवीत् ॥ ७
विद्याबलं पन्नगेन्द्र पश्य मेऽस्मिन्वनस्पतौ ।
अहं संजीवयाम्येनं पश्यतस्ते भुजंगम ॥ ८
ततः स भगवान्विद्वान्काश्यपो द्विजसत्तमः ।
भस्मराशीकृतं वृक्षं विद्यया समजीवयत् ॥ ९
अङ्कुरं तं स कृतवांस्ततः पर्णद्वयान्वितम् ।
पलाशिनं शाखिनं च तथा विटपिनं पुनः ॥ १०
तं दृष्ट्वा जीवितं वृक्षं काश्यपेन महात्मना ।
उवाच तक्षको ब्रह्मन्नेतदत्यद्भुतं त्वयि ॥ ११
विप्रेन्द्र यद्विषं हन्या मम वा मद्विधस्य वा ।
कं त्वमर्थमभिप्रेप्सुर्यासि तत्र तपोधन ॥ १२
यत्तेऽभिलषितं प्राप्तुं फलं तस्मान्नृपोत्तमात् ।
अहमेव प्रदास्यामि तत्ते यद्यपि दुर्लभम् ॥ १३
विप्रशापाभिभूते च क्षीणायुषि नराधिपे ।
घटमानस्य ते विप्र सिद्धिः संशयिता भवेत् ॥ १४
ततो यशः प्रदीप्तं ते त्रिषु लोकेषु विश्रुतम् ।
विरश्मिरिव घर्मांशुरन्तर्धानमितो व्रजेत् ॥ १५

काश्यप उवाच ।

धनार्थी याम्यहं तत्र तन्मे दित्स भुजंगम ।
ततोऽहं विनिवर्तिष्ये गृहायोरगसत्तम ॥ १६ C 1 1081 B 1 43 16 K 1 43 16

3 M om. काश्यप उ°. S1 K1 T1 कश्यपः; Ko 2 4 Da1 कश्यप उ°, D6 T2 G काश्यपः — b) K3 B1–3 यद्येतम°; Ñ1 2 V1 B4 5 D T1 यद्येतदभि° (D4 यद्येनम°); Ñ3 यमेवम°, G4 यद्येवम°, M4 यमेतम°. — c) G1 4.5 °या दग्धं — After 3, T2 G1 M ins

408* पश्य मन्त्रबलं मेऽद्य न्यग्रोधं दश पन्नग ।

4 Ñ1 3 om सूत उ°. Ś1 K1 S (G2 3 with prefixed श्री) सूतः; Ko 3 4 Ñ2 V1 B1 D (except Da D2.4 5) सौतिरु° — d) M1 5 पन्नगेश्वरः

5 a) Ñ1 2 V1 B D T1 M1 5 तु (for सन्) — b) K2 महामुने; K3 °द्युतिः. Ñ1 2 V1 B D T1 पन्नगेन महात्मना

6 a) Ś1 (*sup. lin.* as in text) तं दृष्ट्वा, G3 संदृष्ट्वा; M5 संदग्धं G1 त च दृष्ट्वा स नागेन्द्रः — c) G2 3 कुरुतत्त्व

7 Before 7, Ś1 K1 S (except G3) ins सूतः; Ko 3 4 Ñ1.2 V1 B1 Dn D1 3 7 सौतिरु°; K2 Ñ3 B2–5 Da D2.4 5 सूत उ°, D6 सौतिः — Ko om 7a–8b. — a) G4 5 °भूते—वृक्षे M (except M1 5) तु तं (for ततो).

8 Ko om 8ab (cf. v. l. 7) — Before 8, B3 ins काश्यप उ°. — b) Ñ1 2 V1 D (except D2 5) T1 G2 मेद्य. — c) Ko 3 Ñ3 (*sup. lin. sec. m* as in text) अयं, G2.3 अमुं.

9 Before 9, D5 ins. सूत उ°, T2 G M (except M1.5) सूतः. — a) K3 4 ततः सोचिंतयद्विद्वान्; D5 ततः स नागो भग°; G2 3 ततस्तु सहसा वि°. — b) K3 मुनिस°

10 a) D3 6 S (except T1 M1) सांकुरं Ñ1 2 V1 Dn D1 T1 कृतवास्तत्र, M कृतवान्पूर्वं (for स कृ°). — b) Ś1 K D3 6 7 पुनः (for ततः) S1 पर्णमया°; K1 °वया°, B5 G1 4 5 पत्र°; G2 3 °फला°; M5 °दला°.

11 a) Ś1 दृष्ट्वा तु, B4 दृष्ट्वा च, D5 स दृष्ट्वा — cd) K1 3 Ñ V1 B D T G1 6 M ब्रह्मन्नैतद्, G2.3 °न्निदम्; Nilp as in text. D3 6.7 अप्यद्भुत

12 a) Ñ1 2 V1 B D T1 द्विजेन्द्र Ś1 K1 सद्विषं, G2 मद्वि° K1 2 हन्यात्. Ñ3 विप्रेण तद्विपं हत्वा (°न्या *sup. lin sec m*). — c) Ko 2 4 B1 2 4 D2 5 T1 G4 5 M किं त्व° Ñ3 G6 °भिप्रेक्ष्य, T2 G2 3 M2 4 °भिप्रेत्य. — d) K3 गच्छसे द्विजसत्तम.

13 a) Ś1 K (K3m as in text) Ñ3 अभिकांक्षितं; D3 6 G (except G3 6) °पितुं. — c) G6 तत्तेहं सप्र°. — d) T2 G (except G4 5) निवर्तस्व द्विजोत्तम

14 a) T2 G2 3 तु, M1 5 अपि (for च). — b) G2.3 °षि नृपोत्तमे — cd) Ñ3 G2 यतमान°. M1.5 transp. विप्र and सिद्धिः.

15 a) D5 सुदीप्तं; G2 3 प्रतिष्ठां (G3 °ष्ठं) — b) Cf. 1. 2. 12d. — c) Ñ1 2 V1 B D T1 निरंशु°. G2 3

C. 1. 1082
B. 1. 43. 17
K. 1. 43. 17

तक्षक उवाच ।

यावद्धनं प्रार्थयसे तस्माद्राज्ञस्ततोऽधिकम् ।
अहं तेऽद्य प्रदास्यामि निवर्तस्व द्विजोत्तम ॥ १७

सूत उवाच ।

तक्षकस्य वचः श्रुत्वा काश्यपो द्विजसत्तमः ।
प्रदध्यौ सुमहातेजा राजानं प्रति बुद्धिमान् ॥ १८
दिव्यज्ञानः स तेजस्वी ज्ञात्वा तं नृपतिं तदा ।
क्षीणायुषं पाण्डवेयमपावर्तत काश्यपः ।
लब्ध्वा वित्तं मुनिवरस्तक्षकाद्यावदीप्सितम् ॥ १९
निवृत्ते काश्यपे तस्मिन्समयेन महात्मनि ।
जगाम तक्षकस्तूर्णं नगरं नागसाह्वयम् ॥ २०
अथ शुश्राव गच्छन्स तक्षको जगतीपतिम् ।
मन्त्रागदैर्विषहरै रक्ष्यमाणं प्रयत्नतः ॥ २१
स चिन्तयामास तदा मायायोगेन पार्थिवः ।
मया वञ्चयितव्योऽसौ क उपायो भवेदिति ॥ २२
ततस्तापसरूपेण प्राहिणोत्स भुजंगमान् ।
फलपत्रोदकं गृह्य राज्ञे नागोऽथ तक्षकः ॥ २३

तक्षक उवाच ।

गच्छध्वं यूयमव्यग्रा राजानं कार्यवत्तया ।
फलपत्रोदकं नाम प्रतिग्राहयितुं नृपम् ॥ २४

सूत उवाच ।

ते तक्षकसमादिष्टास्तथा चक्रुर्भुजंगमाः ।
उपनिन्युस्तथा राज्ञे दर्भानापः फलानि च ॥ २५
तच्च सर्वं स राजेन्द्रः प्रतिजग्राह वीर्यवान् ।

शीताशुर् — d) Ś1 K1 Ñ3 G1 4 5 इह, K0 2-4 D5 G6 इव (for इतो).

16 Ś1 K1 T1 कश्यप, K0 2-4 कश्यप उ°; T2 G M काश्यपः — a) M1 5 त्वद्य (for तत्र) — b) G6 तद्ददस्व; M (except M1 5) दित्स (M3 देहि) तन्मे (for तन्मे दित्स) Ś1 K1 दत्स्व, K3 Ñ1 2 V1 B D T1 देहि, G1 4 5 दिश. — c) G3 अस्मात् (for अहं) — d) Ñ3 गृहीतोर°. Ñ1 2 V1 B D T1 स्वापतेयं प्रगृह्य वै (D5 गृहीत्वोरगसत्तम) — After 16, D5 ins ·

409* यत्तेयं च प्रगृह्य वै विनिवर्ते भुजंगम ।

17 Ś1 K1 S om उवाच — b) G3 विप्र (for राज्ञः) D1 °द्राजससत्तमात् — c) Ñ1 2 V1 B D T1 एव (Da °वं; D6 °नं, D7 °तत्), M1 5 तेभ्यः M2-4 धनं तेह प्र°. — d) D5 तपोधन, G2 3 6 M1 5 महामुने Ñ3 निवर्त द्विजसत्तम. — After 17, K0 4 ins two lines given in App I (No 24)

18 Ś1 K1 S सूत·; K0 3 4 Ñ1 2 V1 B1 D (except Da D2 4 5) सौतिरु° — K2 om. 18^{ab}. — c) Ś1 K1 D1 G (except G3 6) M स (for सु-)

19 a) G2 3 °ज्ञानात् M2 4 °ज्ञानेन ते°. — b) M1 5 तु (for तं) K0 1 3 Ñ3 T2 G2 3 M1 5 ततः. — d) K1 3 4 Da G2 6 उपाव° — After 19^{cd}, D5 ins a passage of four lines given in App I (No 25) — Before 19^{ef}, T2 ins सूतः. — e) G2 वरं; G3 धनं (for वित्तं) — After 19, B3 ins an additional colophon

20 Before 20, B3 ins. सूत उ°. — a) G2 °त्ते ब्राह्मणे. — b) K4 महामनाः; Dn3 D3 °मुनिः — cd) Ś1 transp तक्षकः and नगरं

21 a) B1-3 D5 गच्छंस्तं. — b) G2 3 तं गुप्तं ज°. — c) Ñ Dn D1 मन्त्रैर्गदै·, D5 मन्त्रविद्भि, G4. 5 तन्त्रागतैः. Ñ3 विषहणैः T G2 3 6 M मंत्रैर्विषहरै(M2-4 °णै)र्दिव्यैः; G1 विप्रैर्विषहरैरेव

22 Before 22, Ñ2 V1 B1 4 Dn3 D1 ins सौतिरु°; Ñ3 B2 3 5 Dn1 n2 D2-7 सूत उ°, T1 सूतः — c) G1, 2 मायया वंचित° M अयं (for असौ).

23 cd) Ś1 फलपातोदकं, K3 Ñ3 G6 °पात्रो°; B (B4 marg) D (except Da D5) M3 °दर्भो°, T1 °पुष्पादिकं; M1 2 4 5 °मूलो° (cf v l 24) D5 transp. गृह्य and राज्ञे Ś1 K1 4 G4 5 राज्ञो. M1 3 5 तस्य राज्ञोथ M2. 4 स (for अथ)

24 T2 G2-6 M1 5 om तक्षक उ°. Ś1 K1 D3 6 T1 G1 M2-4 om उवाच — b) Ñ1 V1 कार्यचितया, M1 3 (*inf. lin*) 5 °गौरवात् — c) Ś1 फलपातो°, K0. 1 3 G6 °पात्रो°, Ñ2 3 Da1 Dn D1 °पुष्पो°, B (B4 marg) D2-4 6 7 °दर्भो° (cf v l 23) T2 G1 (by corr.) 4 5 नागाः (for नाम) — d) Ś1 K1 °तुं क्षमं

25 D3 6 7 T2 M2 4 om सूत उ° Ś1 K1 G M1. 3. 5 सूतः, K0 3 4 Ñ1 2 V1 B1 Dn D1 सौतिरु° — b) D5 कर्तुं, G6 निन्युर् (for चक्रुर्). — K1 om from निन्यु (25^{c}) up to गम्यता- (26^{d}) — c) Ś1 K0 3 T1 G4 M1 2 5 तदा. M1 3 5 राज्ञो — d) Ś1 K (K1 om.) D5 दर्भानंबु; D2 दर्भमूल-; S (except T1 M4) °नंभः

26 K1 om up to गम्यता- (cf. v. l 25). — c) T2 G1 4 5 श्रुत्वा D1 T2 G6 M (except M1 5) तु (for च). Ñ1 2 V1 B4 D (except D2. 4 5) T1 G1-3 transp. च and

कृत्वा च तेषां कार्याणि गम्यतामित्युवाच तान् ॥२६
गतेषु तेषु नागेषु तापसच्छद्मरूपिषु ।
अमात्यान्सुहृदश्चैव प्रोवाच स नराधिपः ॥ २७
भक्षयन्तु भवन्तो वै स्वादूनीमानि सर्वशः ।
तापसैरुपनीतानि फलानि सहिता मया ॥ २८
ततो राजा ससचिवः फलान्यादातुमैच्छत ।
यद्गृहीतं फलं राज्ञा तत्र कृमिरभूदणुः
ह्रस्वकः कृष्णनयनस्ताम्रो वर्णेन शौनक ॥ २९
स तं गृह्य नृपश्रेष्ठः सचिवानिदमब्रवीत् ।
स्तअमभ्येति सविता विषादद्य न मे भयम् ॥ ३०
सत्यवागस्तु स मुनिः कृमिको मां दशत्वयम् ।
तक्षको नाम भूत्वा वै तथा परिहृतं भवेत् ॥ ३१
ते चैनमन्ववर्तन्त मन्त्रिणः कालचोदिताः ।
एवमुक्त्वा स राजेन्द्रो ग्रीवायां संनिवेश्य ह ।
कृमिकं प्राहसत्तूर्णं मुमूर्षुर्नष्टचेतनः ॥ ३२
हसन्नेव च भोगेन तक्षकेणाभिवेष्टितः ।
तस्मात्फलाद्विनिष्क्रम्य यत्तद्राज्ञे निवेदितम् ॥ ३३ C 1 1801 B 1 43. 36 K 1 43 36

इति श्रीमहाभारते आदिपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९

तेषा — a) K (except K1) D3 6 7 ह (for तान्).

28 Before 28, B3 ins परीक्षिदु°; D4 राजोवाच.

29 Before 29, B3 D4 ins सौतिरु° — a) G2 3 6 अथ (for ततो). — b) K (except K1) फलान्यत्तुमियेष सः, D5 °न्यादाय वैच्छत — After 29ab, Ñ2.3 V1 B3.4 (om line 2).5 Dn D1 4 ins

410* विधिना संप्रयुक्तो वै ऋषिवाक्येन तेन तु ।
यस्मिन्नेव फले नागस्तमेवाभक्षयत्स्वयम् ।

— c) Ś1 यत्तु त्रातुं; K1 यत्तु त्रातां, Ñ1 यत्तत्र तु; Ñ3 यत्तत्रांतं; V1 यत्तदात्तं, B Da D3.4 6 7 यत्तद्दत्तं, D2 यत्तु दत्तं, T2 G (except G1) M1 5 यज्ज(G2 स ज)ग्राह. B Da D2–4.6 7 राज्ञे; T2 G (except G1) M1 5 राजा Ñ2 Dn D1 T1 ततो भक्षयतस्तस्य — d) Ñ1 2 V1 Dn D1 T1 फलात्; G2 3 M तस्मिन् (for तत्र) Here and below many MSS write क्रिमि- for कृमि-, a difference ignored in the foll readings. B Da D2 4 कृमिस्तत्र भवेदणुः (B2 °ल्पः, B4 5m °थ); D3 6 7 कृमिस्तत्राभवत्तनुः — ef) S1 ताम्रनयनः कृष्णो व° Ko 2 3 Ñ1 2 V1 Dn D1 T1 ताम्रवर्णोथ; B3 D2–7 M4 ताम्रव°. D3 6 7 सोभवत् (for शौ°)

30 a) K2 G2 3 तत् (for तं) D3 स गृह्य तं नृ°, D6 7 G1 तं गृह्य नृपतिश्रे° — Before 30cd, B3 ins. परीक्षिदु°, D4 राजोवाच — d) D3 विपादस्मात्; T2 °दस्य

31 b) A few MSS मा (for मां) G3 दशेदयं; G5 °शत्विति. Ś1 K1 कृमिः कोपाद्द°, Ñ1 2 3 (sup lin sec m) B D (except D3) T1 कृमिर्मा दशतामयं. — c) G4 5 M3 4 transp. भूत्वा and वै G3 भूतो वै, M2 वै नागः. — d) B3 Da परिकृतं

32 Before 32, B3 D4 ins सौतिरु° (cf v 1. 28–9) — a) K4 तं; M (except M1 5) न (for ते) K2 B4m G1 3 चैव°; D7 चैत° Ś1 अनुमन्यत, Ko B4 Dn D1 T1 °नुवर्त°; G2 °न्वमन्यंत. — b) Ko 2 4 D1 5 °नोदिताः; T1 G1 °चोदितः, M (except M1 5) °तं — d) B2 D3 6 7 संन्य(D3 °नि)वेशयत्, G2 3 तं नियम्य ह — e) G2 3 प्राह तं. M1 3 (inf. lin as in text) 5 प्रहसंस्तू°. — f) M (except M1.5) °र्षुः कालचोदितः

33 D3 om 33ab — a) K3 हसन्निव च; Ñ1 2 V1 B1–3 Dn D1 2 4 प्रहसन्नेव; T1 प्रहसन्निव T2 G2 3 6 M (except M1 5) नागेन — b) Ś1 K1 °णाभ्यवेष्टयत; Ñ V1 Dn T1 °केण त्व(Ñ3 °णान्व)वेष्टयत, Ñ3 (sup lin sec m.) °केन स वेष्टि°; B1–3 D2 °केनान्ववेष्टय(B1 °ष्ट)त; D1 °केन त्ववेष्टयत्, D4 °णान्व°, D5 °क्षक· समवेष्टयत्, G2 3 °णाभ्य°, M1 5 °णाभ्यवेष्टत, M4 inf. lin °णाभ्यवेष्टयत — c) K2 transp फलात् and विनि° — d) S1 K M1 5 राज्ञो — After 33, K3.4 Ñ2 3 V1 B D T G (except G3) ins

411* वेष्टयित्वा च भोगेन विनद्य च महास्वनम् ।
अदशत्पृथिवीपालं तक्षकः पन्नगेश्वरः ।

[(L 1) K3 B D1 4 तु (for च) Ñ2 3 V1 Dn T1 G1 2 वेगेन]

Colophon. *Sub-parvan* All MSS (except T2) आस्तीक (v l आस्तिक, अस्तीक). — *Adhy. name* Ko. 2 4 M1 5 क(M1 5 का)श्यपनि(Ko °श्यप परि)वर्तनं; K3 परीक्षितस्वर्गगमनं; Ñ1.2 V1 तक्षकदंशः. *Adhy. no* (figures, words or both) Ko 38, K1 50, K3 (*sup lin sec m*) Ñ3 T 36, Ñ1 2 V1 Dn3 43, B1 42, B2 D4m 41, D5 9, G M 26 (G2 3 28, G6 M3 27) — *S'loka no.*. Ñ3 Da1 Dn 36. — *Aggregate s'loka no* Dn2 1771.

४०

C 1 1802
B 1 44 1
K 1 44 1

सूत उवाच ।

तं तथा मन्त्रिणो दृष्ट्वा भोगेन परिवेष्टितम् ।
विवर्णवदनाः सर्वे रुरुदुर्भृशदुःखिताः ॥ १
तं तु नादं ततः श्रुत्वा मन्त्रिणस्ते प्रदुद्रुवुः ।
अपश्यंश्चैव ते यान्तमाकाशे नागमद्भुतम् ॥
सीमन्तमिव कुर्वाणं नभसः पद्मवर्चसम् ।
तक्षकं पन्नगश्रेष्ठं भृशं शोकपरायणाः ॥ २
ततस्तु ते तद्गृहमग्निना वृतं
प्रदीप्यमानं विषजेन भोगिनः ।
भयात्परित्यज्य दिशः प्रपेदिरे
पपात तच्चाशनिताडितं यथा ॥ ४
ततो नृपे तक्षकतेजसा हते
प्रयुज्य सर्वाः परलोकसत्क्रियाः ।
शुचिर्द्विजो राजपुरोहितस्तदा
तथैव ते तस्य नृपस्य मन्त्रिणः ॥ ५
नृपं शिशुं तस्य सुतं प्रचक्रिरे
समेत्य सर्वे पुरवासिनो जनाः
नृपं यमाहुस्तममित्रघातिनं
कुरुप्रवीरं जनमेजयं जनाः ॥ ६
स बाल एवार्यमतिर्नृपोत्तमः
सहैव तैर्मन्त्रिपुरोहितैस्तदा ।
शशास राज्यं कुरुपुंगवाग्रजो
यथास्य वीरः प्रपितामहस्तथा ॥ ७
ततस्तु राजानममित्रतापनं
समीक्ष्य ते तस्य नृपस्य मन्त्रिणः ।
सुवर्णवर्माणमुपेत्य काशिपं
वपुष्टमार्थं वरयांप्रचक्रमुः ॥ ८
ततः स राजा प्रददौ वपुष्टमां
कुरुप्रवीराय परीक्ष्य धर्मतः ।
स चापि तां प्राप्य मुदा युतोऽभव-

40

1 Ś1 K1 S (G2–5 om) सूतः; K0 3 4 B1 Dn3 D1 सौतिरु° — a) Ñ1 2 V1 Dn ते तथा, G2 3 तत्क्षणात् — b) D5 भोगिना, T G2 3 6 नागेन. — c) K1 Ñ V1 B D G1 विपण्ण°

2 a) D3 6 M2–4 च (for तु) B3 (m as in text) G1 5 M2–4 नागं G1 4 5 M2–4 दृष्ट्वा (for श्रुत्वा) T2 दह्यमान तथा दृष्ट्वा; G2 3 तं दशंतं तदा दृ°; G6 M1 5 दह्यं (G6 °हं)तं तं तथा दृ° — b) K0 सचिवास्ते — c) K4 अपश्यंश्चैव वै सर्वे, Ñ1 2 V1 B D T1 °श्यंत (B4 °स्ते) तथा यांत. — d) K1 अद्भुत; K4 ते यांतं (for आकाशे) K1 3.4 M नागमुत्तम

3 b) K2 D3 6 7 G2 M1 5 °वर्चसः — d) K1 Ñ3 D4 G2 3 M2 4 °शं कोप° — After 3, Ś1 K1 ins. ५१; Ś1 marg. ins an additional colophon. इत्यादिपर्वण्येकपंचाशत्तमोध्यायः(!).

4 b) G2 3 वह्निना (for भो°). — d) K4 Ñ1.2 V1 B D T1 °त राजाशनिताडितो (D2 °पातितो).

5 a) B2 तस्यापि; M1 5 येन्येथ (for ते तस्य).

6 a) D3 4 6 7 M2–4 transp नृपं and सुतं. M1.5 सुतं (for नृपं) K0 2–4 transp शिशुं and सुतं. Ś1 G6 M1 5 नृपस्य चक्रिरे (for सुतं प्र°). — b) Ñ3 S स (G2.3 ते) मंत्रिणस्तत् (G1 °स्तं) पुर° — Ś1 om. 6cd — c) K0. 2 4 G (except G2 3) °त्रतापनं (cf. 8). — d) G1 नृप; G6 तदा (for जनाः).

7 Before 7, B4 ins सूत उ° — b) Da D3 6.7 °पुरोगमैस् — D2 om 7cd. — c) Ś1 K कुरुपांडवाग्र°, T °त्मज°

8 a) T1 M1 5 °त्रघातिनं (cf 6) — After 8a, G1 erroneously repeats 6d. — b) T1 °क्ष्य ते मन्त्रिणस्तस्य सर्वे — c) M1 5 स्ववर्ण°. Ś1 K1 °मचेत्य, K0 2 °मथैत्य; T2 G5 6 °मथेत्य, G2 3 °मथेह Ś1 K1 B5 G1–4 5m M2.4 काश्यपं K2m सवर्णधर्माणमुपेत्य का° — d) K4 T2 G4–6 वपुष्टमार्थे, G2 विनष्टमर्थं; G3 विलुष्टमा°; M1.3 5 °मां तां. Cd वपुष्टमा (as in text) T1 °यांबभूवुः; T2 G1 M °चक्रिरे, G6 यांबभूविरे.

9 b) Ś1 प्रवीक्ष्य; K1 निरी°; B1 G6 M1.5 समी°. — c) G4.5 मुदान्वितो

न चान्यनारीषु मनो दधे क्वचित् ॥ ९
सरःसु फुल्लेषु वनेषु चैव ह
प्रसन्नचेता विजहार वीर्यवान् ।
तथा स राजन्यवरो विजह्रिवा-
न्यथोर्वशीं प्राप्य पुरा पुरूरवाः ॥ १०
वपुष्टमा चापि वरं पतिं तदा
प्रतीतरूपं समवाप्य भूमिपम् ।
भावेन रामा रमयांबभूव वै
विहारकालेष्ववरोधसुन्दरी ॥ ११

इति श्रीमहाभारते आदिपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

सूत उवाच ।
एतस्मिन्नेव काले तु जरत्कारुर्महातपाः ।
चचार पृथिवीं कृत्स्नां यत्रसायंगृहो मुनिः ॥ १
चरन्दीक्षां महातेजा दुश्चरामकृतात्मभिः ।
तीर्थेष्वाप्लवनं कुर्वन्पुण्येषु विचचार ह ॥ २
वायुभक्षो निराहारः शुष्यन्नहरहर्मुनिः ।
स ददर्श पितॄन्गर्ते लम्बमानानधोमुखान् ॥ ३
एकतन्त्ववशिष्टं वै वीरणस्तम्बमाश्रितान् ।
तं च तन्तुं शनैराखुमाददानं बिलाश्रयम् ॥ ४
निराहारान्कृशान्दीनान्गर्तेऽर्तांस्त्राणमिच्छतः ।
उपसृत्य स तान्दीनान्दीनरूपोऽभ्यभाषत ॥ ५
के भवन्तोऽवलम्बन्ते वीरणस्तम्बमाश्रिताः । K.1 45 6

10 ^{a}) K2m D1 कुंजेषु (for फुल्ले°) S1 K Ñ3 T G (except G2 3) M1 5 नगेषु (for वने°) Ś1 K2 Ñ V1 B4 Da Dn D4 T1 G2.3 M1.3.5 om ह K0.2m.3 4 चारुषु; D2 T2 G1 4–6 चैव हि — ^{b}) G6 सप्रियः (for वीर्य°) — ^{c}) T1 G4 5 तया. B5 अपि; D5 च (for स) S राजप्रवरो (G1 राजाप्रतिमो). G1–3 विजह्रे — ^{d}) G4 5 transp. पुरा and पुरू°

11 ^{a}) K2 अवाप्य, D5 सापि, T1 चैव, M5 वापि T2 G1 4 5 पर, Cd as in text B4 transp वरं and पतिं. Ñ1 2 V1 Dn पतिव्रता; M (except M1 5) °ति तथा — ^{b}) Ñ1 2 V1 B (B1m as in text) Dn D1 2 5 M3–5 °रूपा; Da (by contamination) Arjp प्रतिस्वरूप, Cd as in text Arj in his comm. explains प्रतीतरूपं (as in text) G3 प्रतीतमापन्नमवा° G1 2 4–6 तमवाप्य. K0 1 Ñ1 2 V1 B5 Dn D1 2 भूपतिं — ^{c}) S अनन्यभावा (G1 2 4 5 सुखेन रामा). Ñ1 2 V1 B D तं; S सा (for वै)

Colophon. *Sub-parvan* All MSS (except T2) आस्तीक (v l. आस्तिक, अस्तीक) — *Adhy name* K (except K1) जनमेजयाभिषेक., Ñ1 2 V1 जनमेजयराज्याभिषेकः. — *Adhy no* (figures, words or both) K0 39, K1 52, K3 (*sup. lin. sec. m.*) T 37, Ñ1 2 V1 Dn3 44, B1 43, B2 D3 4m 42, D5 10, G M 27 (G2.3 29, G6 M3 28) — *S'loka no* Ñ3 Da1 Dn 11. — *Aggregate s'loka no.* Dn2 1782.

41

1 With adhy. 41–44 cf adhy. 13. — With 1–3^{ab} cf 250* (v. l 1. 13 10) D1 om सूत उ°. S1 K1 S (T2 with prefixed श्री) सूतः; K0 3 4 Dn3 सौतिरु°. — ^{a})=1. 8 5^{a}, 15 1^{a}. — ^{c}) Ś1 K1 4 D1 T1 M (except M1 5) °वीं सर्वां

2 Cf 250* (v l 1. 13. 10) — ^{c}) Ñ2 V1 B D (except D3 4 6 7) °न कृत्वा — ^{d}) D1 °पु विविधेषु च M (except M1 5) पुष्करेषु चचार ह

4 ^{a}) Ś1 (before corr) K1 Ñ3 Da1 D1–4 6.7 G6 °वशिष्टान्; B3 4 एकतस्त्वव°. — ^{b})=22^{b} — M2 4 om. 4^{c}–5^{b} — ^{c}) Da तु (for च) Ñ Dn transp. च and तन्तु B1 transp तं च and तन्तुं. D1 3 4 6 7 तंतु तं दशनै° — ^{d}) Ñ1 2 V1 B Dn D1 5 G (except G3.6) M3 बिलेशयं, Da °शयं.

5 M2 4 om. 5^{ab} (cf v l. 4) — ^{a}) T निराश्रयान् — ^{b}) Ś1 K1 गर्तें तत्राण°, K0.2–4 °र्तें तांस्त्रा°, Ñ1 2 V1 B3 Dn D5 T G2 4–6 °र्तें स्वत्रा°, Ñ3 B1 2 4 5 Da D3 4 6 7 °र्तेषु त्रा°, D1 °र्तें स्वशरण°, D2 आर्तान्स्वत्रा°; G1 M (M2.4 om) °र्तेंस्मिंस्त्रा°; G3 °र्तें संत्रा° (for गर्तेऽर्तांस्त्राणम्* = गर्ते + आर्तान् + त्रा°). — ^{c}) G (except G3 6) °त्य तदा दी°. M3 सर्वान् (for दीनान्).

6 Before 6, B3 D4 (marg.) M3 ins. जरत्कारुरु°. — ^{a})=1. 13. 12^{c}. — ^{b}) Ś1 K1 °णस्तंभ°. — ^{c}) Ñ3

C. 1 1818 B 1 45 6 K 1 45 6 दुर्बलं खादितैर्मूलैराखुना बिलवासिना ॥ ६
वीरणस्तम्बके मूलं यदप्येकमिह स्थितम् ।
तदप्ययं शनैराखुराद्त्ते दशनैः शितैः ॥ ७
छेत्स्यतेऽल्पावशिष्टत्वादेतदप्यचिरादिव ।
ततः स्थ पतितारोऽत्र गर्ते अस्मिन्नधोमुखाः ॥ ८
ततो मे दुःखमुत्पन्नं दृष्ट्वा युष्मानधोमुखान् ।
कृच्छ्रामापदमापन्नान्प्रियं किं करवाणि वः ॥ ९
तपसोऽस्य चतुर्थेन तृतीयेनापि वा पुनः ।
अर्धेन वापि निस्तर्तुमापदं ब्रूत माचिरम् ॥ १०
अथवापि समग्रेण तरन्तु तपसा मम ।
—— —° विधीयताम्

पितर ऊचुः ।
वृद्धो भवान्ब्रह्मचारी यो नस्त्रातुमिहेच्छति ।
न तु विप्राग्र्य तपसा शक्यमेतद्व्यपोहितुम् ॥ १२
अस्ति नस्तात तपसः फलं प्रवदतां वर ।
संतानप्रक्षयाद्ब्रह्मन्पतामो निरयेऽशुचौ ॥ १३
लम्बतामिह नस्तात न ज्ञानं प्रतिभाति वै ।
येन त्वां नाभिजानीमो लोके विख्यातपौरुषम् ॥ १४
वृद्धो भवान्महाभागो यो नः शोच्यान्सुदुःखितान् ।
शोचस्युपेत्य कारुण्याच्छृणु ये वै वयं द्विज ॥ १५
यायावरा नाम वयमृषयः संशितव्रताः ।
लोकात्पुण्यादिह भ्रष्टाः संतानप्रक्षयाद्विभो ॥ १६

दुर्बला, G1 2 M (except M1 5) °ले Da D2 T G3–6 M1 5 खादितं, G1 2 M2–4 °ते Da D2 S मूले (M1 5 °ल) — G2 4 5 om 6^{d}, 7^{a} — ^{d}) T1 G1 ह्याखु°; M (except M1, 5) त्वाखु°

7 G2 4, 5 om 7^{a} (cf v l. 6) — ^{a}) Ś1 D3 5 °स्तंभ° (cf. v. l 6) — ^{b}) K (except K1) °कमवस्थि° — ^{d}) D3 6 7 तुदते D5 °नैः शनैः

8 ^{a}) T2 G छि(G6 छे)द्यते, M1 5 भेत्स्य°. — ^{c}) K (except K1) ततश्च, Ñ V1 B1 3 (both m as in text) 4 5 D T1 M (except M1) °तस्तु; T2 G1 3 6 तत्रस्थाः; G2 4 5 तत्र ते B4 G (except G3) °ता रौद्रे, D5 °ता गर्ते. — ^{d}) D5 रौद्रे (for गर्ते) Ś1 K1 Ñ3 T G2 4 5 ब्रह्मन्न°; Ko 2–4 सर्वेप्य°, Ñ1 2 V1 B D व्यक्तम°, G1 6 M ह्यस्मि°; G3 तस्मि° (for अस्मिन्न°).

9 Before 9, B2 5 ins जरत्कारुरु°. — ^{a}) Ñ V1 B D तस्य (B5 अस्य, B5m D3 4 6 7 अत्र, Da2 तत्र); T G3 6 तस्मात्; G1 2 4 5 M2–4 तेन Ś1 °मापन्नं (cf. ^{c}) M1 5 तत्तु दुःखं समु° — ^{c}) Ś1 T G3 °पन्नाः (Ś1 *sup. lin* T2 G3 °न्नः), G1 °मारूढान्.

10 ^{a}) G1 M2 3 अद्य (for अस्य) — ^{b}) Ñ1, 2 V1 B D (except D5) °नाथवा, T G6 M °न च वा G3 मदीयेन तथा पुनः — ^{c}) K2–4 चापि; M1 5 वाथ. Ś1 K1 तां तर्तुं; T G3 6 M1 संत° — ^{d}) M (except M1 5) °पदः

11 ^{a}) D1 वै; G3 सु-; G6 M1 5 तु (for अपि) — ^{c}) Ś1 K1 G6 एक(G6 °त)स्मात्, Ñ1 2 V1 B D °वेह, T1 G3 M1 3 5 °व स

12 Ś1 K1 D6 S om ऊचुः. — ^{a}) Ś1 Ñ V1 Dn D1 4 G3 वृद्धो; D3 T2 G1 2 4–6 कुतो; D5 सिद्धो (cf v l 15^{a}) — ^{b}) K2–4 Ñ V1 D (except Da2 D3–5) T1 G1–3 M (except M1 5) °च्छसि. — ^{c}) G3 तु सर्वेण. — ^{d}) Ñ V1 B4 Dn D2 5 °क्यते तद् Ko 2 D5 वि(D5 अ)पोहि°.

13 ^{a}) Ñ3 T G3, 6 M1 5 transp तात and तप°. D5 अस्ति चान्यत्तु त° — ^{c})=1 13 14^{c}. Ś1 K Ñ3 T M1, 5 °प्र(T2 °प्रे)क्षयात्त्व(T °द)स्मिन्; G1–3 °प्र(G3 °प्रे)क्षया ब्र°. — ^{d}) Ñ V1 Da1 Dn S पताम (G3 वसतं) B4 °येषु वै (m as in text), M (except M1 5) °ये वयं. — After 13, Dn ins

412* संतानं हि परो धर्म एवमाह पितामहः ।

14 ^{a}) B4 नस्तत्र (m as in text). M (except M1, 5) इह मे (M3 नो) लंबमानानां. — ^{b}) D5 रक्षा न (for न ज्ञानं) — ^{c}) K (except K1) D2 तेन Ś1 K1 D1 त्वा S (except T1 M1 5) om न.

15 ^{a}) Ś1 K1 4 Ñ V1 Dn D1–3 T G1 2 4 5 वृद्धः, D6 7 रुद्रः, G3 ऋषिः (cf v l. 12^{a}) B D (except Dn D1) महातेजा, T G °योगी; M ब्रह्मचारी. — ^{b}) G1 2 4 5 शोचसि दुःखि°; G3 °च्यांश्च दु°, M (except M1 5) त्रातुमिहेच्छति (cf 12^{b}) — After 15^{ab}, G (except G3, 6) M (except M1 5) ins

413* शोच्यान्सुदुःखितानस्मान्कस्माद्वेदविदां वर ।

[First half of this line = 15^{b}, but cf. v. l 15.]. — ^{c}) K3 Da शोचत्युपे°; Ñ2 V1 B Dn D1–4 6 7 °चते चैव. — ^{d}) D5 ये संति च द्वि°. T G transp ये and वै. M1 3 5 च (for वै).

16 ^{ab})=1 13 14^{ab} Ś1 Ñ3 सश्रित°; K (except K1) Dn1 D1 4 6 T1 शसित° (cf v l. 1 1. 2, 13. 10 etc). — ^{c}) S1 (*sup lin* as in text) K1 3 G (except G3 6) स्रस्ताः; Ko 2 4 प्राप्ताः (for भ्रष्टाः). — ^{d}) Ś1 °त्प्रभो, Ñ1 2 V1 B D °न्मुने; Ñ3 T G2–6 °न्विताः; G1 M

प्रनष्टं नस्तपः पुण्यं न हि नस्तन्तुरस्ति वै ।
अस्ति त्वेकोऽद्य नस्तन्तुः सोऽपि नास्ति यथा तथा १७
मन्दभाग्योऽल्पभाग्यानां बन्धुः स किल नः कुले ।
जरत्कारुरिति ख्यातो वेदवेदाङ्गपारगः ।
नियतात्मा महात्मा च सुव्रतः सुमहातपाः ॥ १८
तेन स्म तपसो लोभात्कृच्छ्रमापादिता वयम् ।
न तस्य भार्या पुत्रो वा बान्धवो वास्ति कश्चन ॥१९
तस्माल्लम्बामहे गर्ते नष्टसंज्ञा ह्यनाथवत् ।
स वक्तव्यस्त्वया दृष्ट्वा अस्माकं नाथवत्तया ॥ २०
पितरस्तेऽवलम्बन्ते गर्ते दीना अधोमुखाः ।
साधु दारान्कुरुष्वेति प्रजायस्वेति चाभिभो ।
कुलतन्तुर्हि नः शिष्टस्त्वमेवैकस्तपोधन ॥ २१

यत्तु पश्यसि नो ब्रह्मन्वीरणस्तम्बमाश्रितान् ।
एषोऽस्माकं कुलस्तम्ब आसीत्स्वकुलवर्धनः ॥ २२
यानि पश्यसि वै ब्रह्मन्मूलानीहास्य वीरुधः ।
एते नस्तन्तवस्तात कालेन परिभक्षिताः ॥ २३
यत्त्वेतत्पश्यसि ब्रह्मन्मूलमस्यार्धभक्षितम् ।
तत्र लम्बामहे सर्वे सोऽप्येकस्तप आस्थितः ॥ २४
यमाखुं पश्यसि ब्रह्मन्काल एष महाबलः ।
स तं तपोरतं मन्दं शनैः क्षपयते तुदन् ।
जरत्कारुं तपोलुब्धं मन्दात्मानमचेतसम् ॥ २५
न हि नस्तत्तपस्तस्य तारयिष्यति सत्तम ।
छिन्नमूलान्परिभ्रष्टान्कालोपहतचेतसः ।
नरकप्रतिष्ठान्पश्यास्मान्यथा दुष्कृतिनस्तथा ॥ २६ C 1 1840 B 1 45 2 K 1 45 2

°दिति (M1 5 °द्विज).

17 ^{a}) G2 4 5 तु (for नस्) Ñ1 2 V1 B D तीव्रं (for पुण्यं). G1 प्रनष्टस्तपसः पु° — ^{c}) B3 वैको, B4 D4 ह्येको — ^{d}) M1 5 स हि (for सोऽपि)

18 ^{a})=1. 13. 15^{c} M1 5 मंदभागा, M2–4 °भागो. Ko °पुण्यानां, M2–4 °भागानां — ^{b}) Ś1 K1 transp स and किल D5 बांधवः कि°. Dn D3 4 6 7 तप एकं समास्थि (D3 6 7 °श्रि)तः, D1 यस्य एकांतमास्थितः (cf 1. 13 15^{d}) — ^{e})=1. 13 10^{a} — ^{f}) Ś1 K1 च, K4 स (for सु-)

19 ^{a}) K2 वै, K3 अस्य, B3 M1 3 स्व-, D3 अस्मत् (for स्म). M2 4 ते तस्य. T1 °सो मोहात् — ^{b}) B1 3 5 °दिता महत्; B2 4 D3 6 7 °तं महत् G3 कृच्छ्ररूपादितो वयं. — ^{c}) B1 transp भार्या and पुत्रो — ^{d}) D2 °वो वेति, T1 °वा शपि (sic), T2 °वा चापि, G1 2 4–6 °वो वापि, G3 M1 3 5 °वा अपि, M2 4 °वा वापि. Ñ3 S केचन (G1 कच्चन, G2 as in text).

20 ^{c}) G1 transp स and वक्तव्य°. S1 सम्यक्, Ñ1. 2 V1 B दृष्टः — ^{d}) Ś1 K1 Ñ3 Da Dn1 n3 D1–4 6 7 T अस्माक (as in text), G3 M1 5 चास्मा°; the rest ह्यस्मा°.

21 ^{a}) K2 D1 T1 °स्तव, D3 M1 5 °स्त्वेव — ^{b}) Ś1 K1 D4 T G3 6 अधोमु° (as in text), G2 4 5 ह्यवाङ्मु°, the rest ह्यधोमु°. — ^{d}) K2 चाभिभो, Ñ1 2 V1 B Da D2–7 वा त्वि° K4 Dn D1 प्रजामुत्पादयेति च Cd प्रजायस्व (as in text). — After 21^{cd}, B4 ins a passage of 6 lines given in App. I (No 26). — ^{e}) Da G1 कुले — ^{f}) D5 T2 G स एवैकः (G3 तमेकन्नः); M (except M1 5) स चैवैकः. Ñ3 B3 4 Da1 D1–3. 5–7 T2 M (except M1. 5) °धनः.

22 ^{a}) Ko Ñ3 B1 m 2 Da D3 G (except G3) M1 3 5 यं तु, Ñ1. 2 V1 Dn D1 यस्त्वं (Dn3 यं त्वं), B4 यन्न K3 वै, M1 5 मे (for नो). — K2 (hapl) om 22^{b}–23^{a} — ^{b})=4^{b} — ^{c}) Ko. 4 Da D5 G2 4 5 एको°. Ś1 °स्तंभ; K1 °स्तस्य, Da1 D5 कुले तंतुः. — ^{d}) Ñ1 2 V1 Dn D1 आस्ते Ś1 Ko. 1 3 Ñ3 B (except B4) G6 स (for स्व-).

23 K2 om 23^{a} (cf v l 22) — ^{a}) Ñ3 S चैव (G3 चेद्) त्वं (for वै ब्रह्मन्) — Ś1 K1 3 om (hapl) 23^{b}–24^{a} — ^{b}) K4 T G3 6 M मू (G3 कु)लानीमानि वी°. — ^{c}) K4 B5 Dn1 D1 3 6 T G2 एतेन त°; G3 °न कूपतस्ता°.

24 Ś1 K1 3 om 24^{a} (cf v l 23) — ^{a}) Ko यत्ते तत्, K4 ये त्वे°, B4 G1–6 M2–4 °त्वेकं, D2 नन्वे°, D3 6 7 यच्चै°, T यद्वै°, G1 2 °त्वेक°, G3 M1 5 यदे° — ^{b}) D6 7 मूलमस्या हि, G1 5 °मर्धास्य, G6 °मस्य न — ^{c}) K3 4 Ñ2 V1 B1–3 5 D यत्र, B4 T G1 3 6 M अत्र (M1 5 तेन). Ñ1 2 V1 Dn D1 G3 M (except M1 5) गर्ते (for सर्वे). — ^{d}) S1 K1 M2 4 तपसि स्थित°, Ko 2 3 D3 तप आश्रितः; D2 तपसा स्थितः; G3 6 -स्तंब आश्रि (G3 °हि)तः

25 ^{b}) K3 D5 T एव (for एष) — ^{c}) Ñ V1 B (except B3) Da T G2–5 °रति, M1 5 °रतिः. G6 स तंतुमेकं दिवसै., M2–4 स ततं वितुदन्नाखुः — ^{d}) B2 3 T G3 M1 5 भक्षयते D2 ह्यदन्, D5 रज°, D6 रुद°, G2 4 5 तुन°, M (except M1 5) द्विजः; Cd नुदन् G6 दशनैः क्षयते तु°. — ^{e}) G1 2 तपोवृद्धं — ^{f}) K2 D6 महात्मा°. K1 4 B (except B4) D (except Dn) °चेतनं (cf v. l 1 1. 98^{d}).

26 ^{e}) Hypermetric ! Only Ñ1 3 M2 3 as in text. K नरकस्थान्प्रपश्यास्मान् (Ko °श्यामि), Ñ2 V1 B D अधः प्रविष्टान्प°; T G M1 5 अप्रतिष्ठान्प्रपश्या°; M4 नरकप्रविष्टा°.

C. 1 1841 B 1. 45 29 K. 1 45 29 अस्मासु पतितेष्वत्र सह पूर्वैः पितामहैः ।
छिन्नः कालेन सोऽप्यत्र गन्ता वै नरकं ततः ॥ २७
तपो वाप्यथवा यज्ञो यच्चान्यत्पावनं महत् ।
तत्सर्वं न समं तात संतत्येति सतां मतम् ॥ २८
स तात दृष्ट्वा ब्रूयास्त्वं जरत्कारुं तपस्विनम् ।
यथादृष्टमिदं चास्मै त्वयाख्येयमशेषतः ॥ २९
यथा दारान्प्रकुर्यात्स पुत्रांश्चोत्पादयेद्यथा ।
तथा ब्रह्मंस्त्वया वाच्यः सोऽस्माकं नाथवत्तया ॥ ३०

इति श्रीमहाभारते आदिपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

सूत उवाच ।
एतच्छ्रुत्वा जरत्कारुर्दुःखशोकपरायणः ।
उवाच स्वान्पितॄन्दुःखाद्बाष्पसंदिग्धया गिरा ॥ १
अहमेव जरत्कारुः किल्बिषी भवतां सुतः ।
तद्दण्डं धारयत मे दुष्कृतेरकृतात्मनः ॥ २
पितर ऊचुः ।
पुत्र दिष्ट्यासि संप्राप्त इमं देशं यदृच्छया ।
किमर्थं च त्वया ब्रह्मन्न कृतो दारसंग्रहः ॥ ३

— f)=1 13 17b G6 दुष्कृतकारिणः

27 a) M1 5 अस्माभिस्तु परीतैस्तु. — b) Ñ2 B2 3 5 Dn D1 G2 4 5 M4 सर्वैः (for पूर्वैः) S1 K Ñ3 G6 सहान्वयै., Ñ1 कुलान्वय·, Ñ2 Dn D1 सबांधवैः (for पिता°) — c) Ñ1 D2 M1 छिन्नका°, T1 छिन्नमू° — d) T1 G3 6 तथा, T2 यथा.

28 b) Da1 D2-4 6.7 T2 G3 M1 5 यद्वान्यत् — cd) G6 एतत् (for इति). Ñ1 2 Dn D1 °र्वमपर तात न संतत्या समं मतं.

29 a) Ko स तान् (sic), K1 एतत्तु, Ñ3 V1 D2 7 G (except G6) तं तात, D5 तं ततः. D1 तान्दृष्ट्वैव (for तात दृ°) K3 transp दृष्ट्वा and ब्रूया·. K1 Ñ V1 B D4 5 तं (for त्वं). Ś1 एतद्दृष्ट्वा तु भूयस्त्वां (m अस्मान्दृष्ट्वा ततो ब्रूयात्). — b) Ñ1 2 V1 B1 Dn D1 4 5 तपोधन, B2-5 Da D2 3 6 7 T तपोधन (for तप°). — c) M1 5 अद्य (for यथा) Ñ3 वृत्तं (for दृष्टं) Ś1 K1 दृष्ट्वा वय Ñ1 2 V1 B D चात्र (D5 सर्वं), T G चाद्य (G1 as in D5, G5 चास्य).

30 a) G5 प्रगृह्यात् M (except M1 5) च (for स). — b) M2 3 पुत्र. S1 Ñ1 2 V1 B D (except Da) M5 °त्रानुत्पा°. — c) M (except M1.5) एतत् (for तथा). — d) G4 5 ह्यस्माकं — After 30, Ñ1.2 V1 B3 4 5 (marg , om. line 1) Dn D1.2 4 ins.

414* बान्धवानां हितस्येह यथा चात्मकुलं तथा ।
कस्त्वं बन्धुमिवास्माकमनुशोचसि सत्तम ।
श्रोतुमिच्छाम सर्वेषां को भवानिह तिष्ठति ।

[(L 1) Ñ1 V1 B3 अनुकूलं यथा तथा; B4 यथा मे कुशलं तथा. — (L. 2, 3)=(var) 1. 13. 17cd, 18ab. D2 बंधुरिवा°. D2 4 °मिच्छामि]

Colophon *Sub-parvan name* All MSS (except Dn3 T2 G3) आस्तीक (v l. आस्तिक, अस्तीक) — *Adhy. name* Ko पितृवाक्यं; K3 जरत्कारुपितृसमागमः, Ñ1.2 V1 जरत्कारुपितृदर्शन; G3 M1 5 पितृजरत्कारुसंवाद· — *Adhy. no* (figures, words or both) Ko 40, K1 4 53, K3 (*sup lin sec m*) T 38, Ñ1 2 V1 45, B1 44, B2 47, D3 4 (marg.) 43, D5 11, G M 28 (G2 3 30, G6 M3 29) — *S'loka no* Dn 33. — *Aggregate s'loka no.*. Dn2 1915.

42

1 Ko 3 4 Ñ1 2 V1 B1 Dn D1 सौतिरु°, K1 S (T2 with prefixed श्री; G1 5 M2 4 om. the ref.) सूतः. — b) Ñ1 2 V1 Dn D1 S भृशं (for दुःख·); cf. 1. 43. 30d, 46 34f — c) Ñ1 2 V1 B D (for D5 see below) तान् (for स्वान्). D3 सर्वान्, G3 मुख्यान् (for दुःखात्). D5 आह तांश्च पि° — d) V1 B D (except Dn D1) G6 बाष्पगद्गदया; Cd as in text (cf. 1. 43 31). — After 1, K2-4 Ñ1 2 V1 B D ins

415* जरत्कारुरुवाच ।
मम पूर्वे भवन्तो वै पितरः सपितामहाः ।
तद्ब्रूत यन्मया कार्यं भवतां प्रियकाम्यया ।
[L. 1=1. 13. 19ab]

2 Before 2, Ś1 S (except G3 6 M1 5) ins जरत्कारुः. — c) Ñ2 Dn ते (for तत्). — d) Ś1 K1 °तेनाकृता°; D3 7 °तेतरकर्मणः; M1.5 पुष्कलं चाकृ°.

3 Ś1 S om. ऊचुः (M5 om. the ref). — c) K (except K1) तु (for च) — After 3, Ko.4 Da1 ins. a passage given in App. I (No. 27).

जरत्कारुरुवाच ।

ममायं पितरो नित्यं हृयर्थः परिवर्तते ।
ऊर्ध्वरेताः शरीरं वै प्रापयेयममुत्र वै ॥ ४

एवं दृष्ट्वा तु भवतः शकुन्तानिव लम्बतः ।
मया निवर्तिता बुद्धिर्ब्रह्मचर्यात्पितामहाः ॥ ५

करिष्ये वः प्रियं कामं निवेक्ष्ये नात्र संशयः ।
सनाम्नीं यद्यहं कन्यामुपलप्स्ये कदाचन ॥ ६

भविष्यति च या काचिद्भैक्षवत्स्वयमुद्यता ।
प्रतिग्रहीता तामस्मि न भरेयं च यामहम् ॥ ७

एवंविधमहं कुर्यां निवेशं प्राप्नुयां यदि ।
अन्यथा न करिष्ये तु सत्यमेतत्पितामहाः ॥ ८

सूत उवाच ।

एवमुक्त्वा तु स पितॄंश्चचार पृथिवीं मुनिः ।
न च स्म लभते भार्यां वृद्धोऽयमिति शौनक ॥ ९

यदा निर्वेदमापन्नः पितृभिश्चोदितस्तथा ।
तदारण्यं स गत्वोच्चैश्चुक्रोश भृशदुःखितः ॥ १०

यानि भूतानि सन्तीह स्थावराणि चराणि च ।
अन्तर्हितानि वा यानि तानि शृण्वन्तु मे वचः ॥ ११

उग्रे तपसि वर्तन्तं पितरश्चोदयन्ति माम् ।
निविशस्वेति दुःखार्तास्तेषां प्रियचिकीर्षया ॥ १२

निवेशार्थ्यखिलां भूमिं कन्याभैक्षं चरामि भोः ।
दरिद्रो दुःखशीलश्च पितृभिः संनियोजितः ॥ १३ K.1 46 16

---

4 Ś1 K1 2 D6 S (except G5) om उवाच. — b) G3 6 हृदि संपरि° — d) B2 D2 5 °येहम°; Cd as in text. B1.2 4 Da D5 T G1–5 M5 ह; D2 G6 च (for वै) — After 4, K4 Ñ1.2 V1 B D ins

416* न दारान्वै करिष्येऽहमिति मे भावितं मनः ।

=(var) 1 13 23[ab]

5 b) M1 5 शोकार्तानिव.

6 a) G (except G1 6) कार्यं (for कामं). — b) Ñ1.2 V1 B D °क्ष्येहमसंशयं — c) Ñ3 S सनामां

7 a) S1 K हि (for च) M (except M1 5) °ति यदा का°. — b) Here and below the majority of N MSS. भैक्ष्य-. — c) G3 प्रतिगृह्य सनामां च — d) B5 reads न after च. G6 उद्वहेयं; Cd as in text. K2 D2 5 S (except G1) तां (for यां). Ś1 K1 नेतरां रोचयाम्यहं.

8 ab) B4 G2–4 °विधा°. B4 भार्यां; G3 6 कन्यां (for कुर्यां) M1 5 कुर्या निवेशं पितर एवं संप्रा° — c) S1 K M (except M1 5) करिष्यामि; Ñ V1 B D °ष्येहं, T2 G6 °ष्ये तत् — d) K1 न संशयः (for पिता°) T सत्यमेव ब्रवीमि वः. — After 8, K3 4 (om. line 1) Ñ1 2 V1 B D ins.

417* तत्र चोत्पत्स्यते जन्तुर्भवतां तारणाय वै ।
शाश्वताश्चाव्ययाश्चैव तिष्ठन्तु पितरो मम ।

[=(var) 1. 13. 28. — (L 2) K4 शाश्वतं चाव्ययं चैव पितरो वै मतं मम]

9 Ś1 K1 S (G3 om) सूतः; Ko 3 4 B1 D1 सौतिरु°. — a) D2 स मुनिः; G3 पृथिवीं. — b) G3 °र स महामुनिः. — c) M1 5 कार्यं (for भार्यां) — d) D6 7 चानघ (for शौ°).

10 Before 10, Ko (irrelevantly) ins शौनक उ°. — b) D2 °भिर्देशितस्त°, D5 °भिर्नोदितो यथा, T G3 6 M1 5 °भिश्च प्रचोदितः. — c) B4 ततो°; B5 G3 तथा° (for तदा°). Ko स गत्वा वै, M1 प्रविश्योच्चैः, M5 प्रपश्यो°. — After 10, Ñ1 2 V1 B D (except Da) ins :

418* स त्वरण्यगतः प्राज्ञः पितॄणां हितकाम्यया ।
उवाच कन्यां याचामि तिस्रो वाचः शनैरिमाः ।

[(L. 1) B D2 प्रियका°. — (L. 2) Cf 1. 13. 30. Ñ1 V1 B1–3 4m D2–7 भिक्षां (for कन्यां)]

11 a) Ś1 K1 4 transp भूतानि and सन्तीह — b) Ko G1 2 4–6 जंगमस्थावराणि च; K2 3 Ñ3 T G3 M जगमानि स्थिराणि च, K4 स्थिराणि च च°; D5 °णि च सर्वशः. — c) Ś1 Ko 1 4 D2 3 6 7 यानीह, Da1 यावंति, T G1.3 6 M1 5 चान्यानि.

12 b) D5 °तरो नोद° B4 वै (for माम्) — c) Ko D2 5 G1 निवेशस्वे°; B3 निविशं वोत्र; G2 4 5 निवेशये(G2 °य)ति. Cd appears to have read निवेशं (cf. B3 above) — d) Ñ2 Dn D1 संतानस्य चि°.

13 a) K4 Ñ V1 B3 D T2 G3 M2–4 निवेशाया(D5 °र्थो)खि°; B4 5 निविशास्य(B5 °प्य)खि°; T1 निवेशिदखि°; G1 निवेशार्थं खि°; G2 निवेशाद्यखि°; M1 5 निवेश्यर्थां(M5 °त्वा)खि°. — b) D1 T G3 6 M अहं (for भोः). — d) D2 M3 °भिश्च नियो°.

14 a) K4 B4 (m as in text) कस्य; M1 5 तस्या (sic). — b) D5 7 T1 या (for ये). D1 मयेह परिकीर्तितं; S (except T1 G3 M1 5) गुणैः सम्यक् प्रकीर्तिताः (M2–4 °र्त्यंतां). — c) D5 कन्यां प्रयच्छतु स मे; G (except G3) M (except M1 5) प्रयच्छतु स मे कन्यां.

C. 1 1862 B. 1 46. 17 K. 1. 46 17 यस्य कन्यास्ति भूतस्य ये मयेह प्रकीर्तिताः ।
ते मे कन्यां प्रयच्छन्तु चरतः सर्वतो दिशम् ॥ १४
मम कन्या सनाम्नी या भैक्षवच्चोद्यता भवेत् ।
भरेयं चैव यां नाहं तां मे कन्यां प्रयच्छत ॥ १५
ततस्ते पन्नगा ये वै जरत्कारौ समाहिताः ।
तामादाय प्रवृत्तिं ते वासुकेः प्रत्यवेदयन् ॥ १६
तेषां श्रुत्वा स नागेन्द्रः कन्यां तां समलंकृताम् ।
प्रगृह्यारण्यमगमत्समीपं तस्य पन्नगः ॥ १७
तत्र तां भैक्षवत्कन्यां प्रादात्तस्मै महात्मने ।
नागेन्द्रो वासुकिर्ब्रह्मन्न स तां प्रत्यगृह्णत ॥ १८
असनामेति वै मत्वा भरणे चाविचारिते ।
मोक्षभावे स्थितश्चापि द्वन्द्वीभूतः परिग्रहे ॥ १९
ततो नाम स कन्यायाः पप्रच्छ भृगुनन्दन ।
वासुके भरणं चास्या न कुर्यामित्युवाच ह ॥ २०

इति श्रीमहाभारते आदिपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

सूत उवाच ।
वासुकिस्त्वब्रवीद्वाक्यं जरत्कारुमृषिं तदा ।
सनामा तव कन्येयं स्वसा मे तपसान्विता ॥ १
भरिष्यामि च ते भार्यां प्रतीच्छेमां द्विजोत्तम ।
रक्षणं च करिष्येऽस्याः सर्वशक्त्या तपोधन ॥ २
प्रतिश्रुते तु नागेन भरिष्ये भगिनीमिति ।

---

15 ^{a}) B1 transp मम and कन्या Ñ3 S (except G2) सनामा T1 एव, T2 G3 M3 5 वै (for या) — ^{b}) Ś1 K2 Ñ1 2 V1 B2 D3 6 7 चोदिता — ^{c}) T1 केवलां (for चैव यां). G3 नाहं तां (for यां नाहं) — ^{d}) G3 एवं (for तां मे). K2 B3 D3 5 7 S (except T2 G3 M1 5) °च्छतु (G6 °थ)

16 Before 16, K0 ins सूत उ°, K4 सौतिरु°; S (except G3 M3) सूतः — ^{a}) T2 G2 4 5 तु (for ते) D3 6 7 ते; M1 5 च (for वै) — ^{b}) K1 D5 T1 G3 °त्कारोः; K2 °त्कारु- M2 3 (*inf lin*) 4 सुयोजिताः — ^{c}) S1 D3 6 7 वै (for ते) — ^{d}) G3 वासुकिं Ś1 संन्यवे°, K1 पर्यवे°

17 ^{a}) G6 अथ (for स) — ^{b}) K3 Ñ1 2 V1 D (except D2. 5) M transp कन्यां and तां G3 कन्यकां सम°

18 ^{a}) B1 ततस्तां, Dn3 तत्रैतां; T G1. 3. 6 M1 5 स तत्र. — ^{c}) T1 G3 6 M1 कालेन (for नागेन्द्रो) — ^{d}) Ś1 न च तां; K0. 2. 3 Ñ3 न च स D2 न स प्रत्यग्रहीच्च तां.

19 ^{ab}) S1 K1 B1 5 M °नाम्नीति D5 G3 M तां (for वै). T2 G1 2 4 5 °ति कृत्वा वै Ś1 K1 च वि°, D5–7 वावि°. K4 सनामा तु भवेद्या मे न भरेय तु यामहं — ^{c}) G (except G3 6) मोक्ष एव; M1 5 भैक्षभा°; Cd as in text. — ^{d}) K0 T G3 M द्वैधीभू°; Ñ2 V1 Dn द्वंद्वभू°; D5 G1. 4–6 मंदीभू°; G2 मंत्रीभू°; Cd as in text Ś1 K1 प्रतिग्र°.

20 ^{b}) G2 अपृच्छत्. — After 20^{b}, K4 Ñ3 ins 1. 13. 33 (v l भुजगमं for महातपा.) — ^{c}) S1 K1 B2 Da D5 T2 G1–5 M वासुके (as in text), T1 G6 °किः; the rest °कि — ^{d}) M1 3 5 तं (for ह). — After 20, B3 ins a passage of six lines consisting of a question by Ruru (2 lines) and answer by Pramati (4 lines), the latter being merely a repetition of 1 13 35–[illegible] (see App I, No 28).

Colophon *Sub-parvan* All MSS (except Dn D7 T2) आस्तीक (v l आस्तिक, अस्तीक) — *Adhy name* K3 कन्याप्रदानं, Ñ1 2 V1 वासुकिजरत्कारुसमागमः G3 भार्यान्वेषणं — *Adhy no* (figures, words or both) Ś1 K1 54, K3 (*sup lin sec m*) T1 39; B[illegible] 45, B2 D3 4 (marg) 44, D5 12, T2 G M 29 (G2 31, G6 M3 30) — *S'loka no.* Ñ3 21, Da1 Dn 2[illegible] — *Aggregate s'loka no.* Dn2 1836.

43

1 S1 K1 S (G4–6 om the ref) सूतः; K0. 3 4 (with prefixed श्री) Ñ1 2 V1 B1 Dn D1 सौतिरुवाच. — ^{b}) [illegible] इदं (for ऋषिं). D6 प्रति (for तदा). — ^{c}) The MSS vary at random between सनामा and °म्नी (cf. v. l. 42 19) — ^{d}) M1 5 वै (for मे).

2 ^{a}) Ñ1. 3 ते कन्यां — S1 om. 2^{cd} — ^{d}) B4 यथाशक्त्य[illegible] B3 द्विजोत्तम. — After 2, K3 4 Ñ V1 B D T2 [illegible] (except G3) ins.:

ारत्कारुस्तदा वेश्म भुजगस्य जगाम ह ॥ ३
ात्र मन्त्रविदां श्रेष्ठस्तपोवृद्धो महाव्रतः ।
ागृाह पाणिं धर्मात्मा विधिमन्त्रपुरस्कृतम् ॥ ४
ातो वासगृहं शुभ्रं पन्नगेन्द्रस्य संमतम् ।
ागाम भार्यामादाय स्तूयमानो महर्षिभिः ॥ ५
ायनं तत्र वै क्लृप्तं स्पर्ध्यास्तरणसंवृतम् ।
ात्र भार्यासहायः स जरत्कारुरुवास ह ॥ ६
। तत्र समयं चक्रे भार्यया सह सत्तमः ।
वेप्रियं मे न कर्तव्यं न च वाच्यं कदाचन ॥ ७
यजेयमप्रिये हि त्वां कृते वासं च ते गृहे ।
ातद्गृहाण वचनं मया यत्समुदीरितम् ॥ ८
ातः परमसंविग्ना स्वसा नागपतेस्तु सा ।
अतिदुःखान्विता वाचं तमुवाचैवमस्त्विति ॥ ९
तथैव सा च भर्तारं दुःखशीलमुपाचरत् ।
उपायैः श्वेतकाकीयैः प्रियकामा यशस्विनी ॥ १०
ऋतुकाले ततः स्नाता कदाचिद्वासुकेः स्वसा ।
भर्तारं तं यथान्यायमुपतस्थे महामुनिम् ॥ ११
तत्र तस्याः समभवद्गर्भो ज्वलनसंनिभः ।
अतीव तपसा युक्तो वैश्वानरसमद्युतिः ।
शुक्लपक्षे यथा सोमो व्यवर्धत तथैव सः ॥ १२
ततः कतिपयाहस्य जरत्कारुर्महातपाः ।
उत्सङ्गेऽस्याः शिरः कृत्वा सुष्वाप परिखिन्नवत् ॥१३
तस्मिंश्च सुप्ते विप्रेन्द्रे सवितास्तमियाद्गिरिम् ।
अह्नः परिक्षये ब्रह्मंस्ततः साचिन्तयत्तदा । K. 1 47 ;15

419* त्वदर्थं रक्ष्यते चैषा मया मुनिवरोत्तम ।
ऋषिरुवाच ।
न भरिष्येऽहमेतां वै एष मे समयः कृतः ।
अप्रियं च न कर्तव्यं कृते चैनां त्यजाम्यहम् ।

[(L 1) K3 Ñ3 D5 T2 G (except G3) रक्षिता. K4 3 B Da D2 5 T2 G (except G3) मुनिवर प्रभो — (L 2) n वै (for मे) T2 G (except G3) अप्रियं मा करिष्येच्च.]

3 Before 3, K0 Ñ3 (*sup lin sec m*) B3 D2 ins. त उ°, K4 Ñ1 2 V1 B1 Dn D1 4 सौतिरु°, T G M2 4 त: (G4 5 सौति·). — ^{a}) B5 D3 6 7 °श्रुते च, D2 °श्रुतेन; [1 3 5 °ज्ञाते तु — ^{c}) K3 ततो (for °दा) — ^{d}) The [SS vary at random between भुजग- and भुजं°

4 ^{a}) K3 तत्र वेदविदां; M1 तदापि द्विविदां, M5 ततो ाद्विविदां — ^{b}) K3 तपोनिष्ठो D4 G1 2 4 5 महातपाः; 1 °बल·, T2 G3 6 M °मतिः — ^{c}) B1 कन्यायाः (m मात्मा as in text)

5 Ñ1 om 5^{ab}. — ^{a}) G6 °गृहे शुभ्रे. K2 शुद्धं; Ñ2.3 1 B D रम्य. — ^{b}) S धीमतः (G1 भूभृतः) (for सं°). - ^{c}) S1 K1 जग्राह भा°. — ^{d}) G6 मनीषिभिः.

6 ^{a}) Ñ V1 D संक्लृप्तं (D2 5 as in text, D3 7 क्लृप्तं). — ^{b}) K1 सन्न्यास्तरण°, K2 महा°; D2 स्वच्छा°; D3 ाध्या°, T1 G4 स्वाध्या°; G1 सुष्टा°; G2 5 स्त्रध्या°, Cd as ι text D5 G3 6 M (except M1 5) परार्ध्यास्तरणावृ(D5 न्व)तं — ^{c}) K0 T1 G1–3 सन्; K4 तु; Ñ V1 Dn वै, B a D1 2 4 5 असौ (for स) G6 स तत्र भार्यासहितो

